# अभ्यासः

२. एकपदेन उत्तरं लिखत-

क) सिंहस्य नाम किम् ? खरनखरः

ख) गुहायाः स्वामी कः आसीत् ? दधिपुच्छः

ग) सिंहः कस्मिन् समये गुहायाः समीपे आगतः ? सूर्यास्ते

घ) हस्तपादादिकाः क्रियाः केषां न प्रवर्तन्ते ? भयसन्त्रस्तमनसां

ङ) गुहा केन प्रतिध्वनिता ? उच्चगर्जनेन

३. पूर्णवाक्येन उत्तरत

क) खरनखरः कुत्र प्रतिवसति स्म ?

उ) खरनखरः एकस्मिन् वने प्रतिवसति स्म।

ख) महतीं गुहां दृष्ट्वा सिंहः किम् अचिन्तयत् ?

उ) महतीं गुहां दृष्ट्वा सिंहः अचिन्तयत् यत् :- "नूनम्

एतस्यां गुहायां रात्रौ कोऽपि जीवः आगच्छति।"

ग) शृगालः किम् अचिन्तयत् ?

उ) शृगालः अचिन्तयत् यत् - "अहो विनष्टोऽस्मि। नूनम् अस्मिन् बिले सिंहः अस्ति इति तर्कयामि। तत् किं करवाणि ?"

घ) शृगालः कुत्र पलायितः ?

उ) शृगालः दूरं पलायितः।

ङ) गुहासमीपमागत्य शृगालं किं पश्यति ?

उ) गुहासमीपमागत्य शृगालं सिंहपदपद्धतिं पश्यति।

च) कः शोभते ?

उ) अनागतं यः कुरुते सः शोभते

4. रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत-

क) क्षुधार्तः सिंहः कुत्रापि आहारं न प्राप्तवान्।

उ) कीदृशः सिंहः कुत्रापि आहारं न प्राप्तवान्?

ख) दधिपुच्छः नामः शृगालः गुहायाः स्वामी आसीत्।

उ) किम् नामः शृगालः गुहायाः स्वामी आसीत्?

ग) एषा गुहा स्वामिनः सदा आह्वानं करोति।

उ) एक गुहा कस्य सदा आह्वानं करोति?

घ) भयसन्त्रस्तमनसां हस्तपादादिकाः क्रियाः न प्रवर्तन्ते।

उ) भयसन्त्रस्तमनसां कीदृशाः क्रियाः न प्रवर्तन्ते?

ङ) आह्वानेन शृगालः बिले प्रविश्य सिंहस्य भोज्यं भविष्यति।

उ) आह्वानेन शृगालः कुत्र प्रविश्य सिंहस्य भोज्यं भविष्यति।

5. घटनाक्रमानुसारं वाक्यानि लिखत-

ग) परिभ्रमन् सिंहः क्षुधार्तो जातः।

ख) सिंहः एकां महतीं गुहाम् अपश्यत।

क) गुहायाः स्वामी दधिपुच्छः नाम शृगालः समागच्छत्।

छ) गुहायां कोऽपि अस्ति इति शृगालस्य विचारः।

घ) दूरस्थः शृगालः रवं कर्तुमारब्धः।

ङ) सिंहः शृगालस्य आह्वानमकरोत्।

च) दूरं पलायमानः शृगालः श्लोकमपठत्।

6. यथा निर्देशमुत्तरत -

क) 'एकां महतीं गुहां दृष्ट्वा सः अचिन्तयत्' अस्मिन् वाक्ये कति विशेषणपदानि, संख्यया सह पदानि अपि लिखत?

उ) अस्मिन् वाक्ये द्वौ विशेषणपदानि - एकां, महतीं च।

ख) तदहम् अस्य आह्वानम् करोमि - अत्र 'अहम्' इति पदं कस्मै प्रयुक्तम्?

उ) 'अहम्' इति पदं शृगालाय प्रयुक्तम्।

ग) 'यदि त्वं मां न आह्वायसि' - अत्र कर्तृपदं किम् ?

उ) अत्र कर्तृपदं 'त्वं' अस्ति।

घ) 'सिंहपदपद्धतिः गुहायां प्रविष्टा दृश्यते' - अत्र क्रियापदं किम्?

उ) अत्र क्रियापदम 'दृश्यते' अस्ति।

ङ) 'वनेऽत्र संस्थस्य जरा समागता' अस्मिन् वाक्ये अव्यय किम्?

उ) अस्मिन् वाक्ये अव्ययपदं 'अत्र' अस्ति।

7. रिक्तस्थानानि पूरयत -

एकस्मिन् वने कश्चन व्याधः जालं विस्तीर्य दूरे स्थितः। क्रमशः आकाशात् सपरिवारः कपोतराजः नीचैः आगच्छत्। यदा कपोताः तण्डुलान् अपश्यत तदा तेषां लोभो जातः। परं राजा सहमतः नासित। तस्य युक्तिः आसित यदि वने कोऽपि मनुष्यः नास्ति। कुतः तण्डुलान् सम्भवः। परम् राज्ञः उपदेशम् अस्वीकृत्य कपोताः तण्डुलान् खादितुं प्रवृत्ताः जाले च निपतिताः। अतः उक्तम् 'सहसा विदधित न क्रियाम्।'